# 20. संस्कृतभाषायाः वैशिष्ट्यम्

[સંસ્કૃત ભાષાની અનેક વિશેષતાઓ છે. એક તો આ આપણા ભારતની પ્રાચીનતમ ભાષા છે. વળી તે આપણી સાંસ્કૃતિક રાષ્ટ્રભાષા પણ છે. તે ભારતીય પ્રાચીન સભ્યતા તથા સંસ્કૃતિવાહક છે. આ ઉપરાંત સંસ્કૃતભાષા માત્ર ભારતીય ભાષાઓની જ નહીં, પરંતુ વિશ્વની અનેક ભાષાઓની જનની છે.

સંસ્કૃતની ખ્યાતિ સર્વત્ર છે. પરંતુ અત્યારે તે પ્રાચીન જમાનાની જેમ બોલચાલની ભાષા રહી નથી. આને લીધે લોકોને તેની સાથે આત્મીયતા બંધાતી નથી. એક ભાષા તરીકે સંસ્કૃતની જે ખૂબીઓ છે, તે જનસમાજે જાણવી જરૂરી છે. પ્રસ્તુત પાઠમાં તે દિશામાં પ્રવૃત્તિનો ઉપક્રમ અને પ્રયત્ન છે.

અહીં સંસ્કૃતની ભાષાગત વિશેષતાઓની સાથે તેનામાં રહેલું અભિવ્યક્તિનું સામર્થ્ય અને અભિવ્યક્તિ માટેના વિવિધ વિકલ્પોને સમજાવવાનો ઉપક્રમ રાખ્યો છે. આ ઉપક્રમમાં ભાષાનું અને ભાવનું ભારણ વધી ન જાય, તેનું પણ ધ્યાન રાખવામાં આવ્યું છે.]

---

वयं जानीमः यत् संस्कृतभाषा सर्वासां भारतीयभाषाणां जननी वर्तते । अथ च संसारे याः भाषाः सन्ति तासु सा प्राचीनतमा भाषा । अस्याः भाषायाः अनेकविधं वैशिष्ट्यम् अस्ति । अत्र उदाहरणरूपेण किञ्चित् वैशिष्ट्यं प्रदर्शयामः ।

प्रथमं वैशिष्ट्यम् । संसारस्य समस्तेषु पुस्तकालयेषु प्राचीनतमः ग्रन्थः वर्तते ऋग्वेदः । अयमपि संस्कृतभाषायाः एव ग्रन्थः । एवं संसारस्य प्रथमं पुस्तकमपि संस्कृतस्यैव वर्तते न तु कस्याश्चित् अन्यस्याः भाषायाः ।



द्वितीयं वैशिष्ट्यम् । संस्कृतभाषाया: या वर्णमाला अस्ति, तत्र य: वर्णक्रम: निर्धारित: वर्तते, स: वैज्ञानिक: तार्किक: च अस्ति । प्रकृतित: सर्वेभ्य: मानवेभ्य: यत् उच्चारणतन्त्रं प्राप्तम् अस्ति, तस्य अनुसरणं कृत्वा अत्र वर्णमालायां वर्णानां क्रम: निर्धारितो वर्तते । उच्चारणतन्त्रस्य अनुसारम् अकारस्य उच्चारणम् प्रथमं भवति । अत: वर्णमालायाम् अकार: प्रथम: वर्तते । एवमेव व्यञ्जनवर्णेषु ककारस्य क्रम: पूर्वं चकारस्य च क्रम: पश्चात् वर्तते तस्यापि कारणमिदमेव । अन्यासु भाषासु या: वर्णमाला: सन्ति, तत्र एतादृश: तार्किक: वैज्ञानिकश्च क्रम: न मिलति ।

तृतीयं वैशिष्ट्यम् । आचार्येण पाणिनिना विरचितम् अष्टाध्यायीनाम्ना प्रसिद्धं संस्कृतव्याकरणं मानवमस्तिष्कस्य सर्वोत्तमा कृति: वर्तते । एतादृशं व्याकरणम् अन्यत्र न उपलभ्यते ।

चतुर्थं वैशिष्ट्यम् । संस्कृतभाषायां महाभारतनाम्ना प्रसिद्ध: एक: ग्रन्थ: वर्तते । स: लक्षश्लोक-परिमित: । एतादृश: विशालकाय: ग्रन्थ: निखिलेऽपि संसारे नास्ति । इदमपि संस्कृतस्य अपरं वैशिष्ट्यम् ।

पञ्चमं वैशिष्ट्यम् । रामायणम् नाम सुप्रसिद्धम् आदिकाव्यम् अस्ति । पुरातने भारते अयं ग्रन्थ: अनेकासु लिपिषु लिखित: । सम्प्रति स: नेवारी, मैथिली, बंगाली, देवनागरी, तेलगु, ग्रन्थ, मलयालम, शारदा इत्यादिषु लिपिषु लिखित: मिलति । संस्कृतभाषाया: एतादृशा: बहवो ग्रन्था: सन्ति ये प्राचीनकाले अनेकासु लिपिषु लिखिता: । एतादृश: उपक्रम: अपि संस्कृतस्यैव वैशिष्ट्यम् वर्तते ।




षष्ठं वैशिष्ट्यम् । संस्कृतभाषाया: पञ्चतन्त्रनामक: ग्रन्थ: प्राय: विश्वस्य सर्वासु भाषासु अनूदित: वर्तते । एतादृशं सौभाग्यम् अन्यस्या: कस्याश्चित् भाषाया: ग्रन्थेन अद्यावधि न प्राप्तम् ।



सप्तमं वैशिष्ट्यम् । संस्कृतसाहित्ये दशकुमारचरितनाम्ना प्रसिद्धम् कथापुस्तकम् वर्तते । तस्य सप्तमे उच्छ्वासे एकं पात्रं प-वर्गप्रयोगरहितानि वाक्यानि वदति । वर्णमालायाः अमुकान् वर्णान् विहाय संवादकरणं संस्कृते एव संभवति, नान्यत्र ।

अष्टमं वैशिष्ट्यम् । एकस्य वर्णस्य प्रयोगेण काव्यकरणम् संस्कृते एव संभवति । महाकविना माघेन विरचिते शिशुपालवधमहाकाव्ये दकारस्य नकारस्य च एकमात्रस्य वर्णस्य प्रयोगेण निर्मितानि पद्यानि अस्य प्रमाणानि सन्ति ।

एवम् संस्कृतस्य अनेकानि वैशिष्ट्यानि सन्ति ।

## ટિપ્પણી

**નામ (પુંલ્લિંગ) : अकारः** **अ** અક્ષર, વર્ણમાળાનો પ્રથમ સ્વર-અક્ષર **ककारः** **क** અક્ષર, વ્યંજનોમાં પ્રથમ વર્ણ

**(સ્ત્રીલિંગ) : प्रकृतिः** કુદરત

**(નપુંસકલિંગ) : वैशिष्ट्यम्** વિશેષતા, ખાસિયત **मस्तिष्कम्** મસ્તક, દિમાગ

**વિશેષણ : प्राचीनतम** સૌથી પ્રાચીન, અતિશય જૂનું **तादृश** તેવું **एतादृश** આવું **एकाधिक** એક કરતાં વધારે

**અવ્યય : प्रायः** મોટા ભાગે, ઘણું કરીને **अद्य** આજે

**સમાસ :** पुस्तकालयः (पुस्तकानाम् आलयः पुस्तकालयः । षष्ठी तत्पुरुष) । कथापुस्तकम् (कथानाम् पुस्तकम् कथापुस्तकम् । षष्ठी तत्पुरुष) । वर्णमाला (वर्णानां माला वर्णमाला । षष्ठी तत्पुरुष) । मानवमस्तिष्कम् (मानवस्य मस्तिष्कम् मानवमस्तिष्कम् । षष्ठी तत्पुरुष) । शिशुपालवधः (शिशुपालस्य वधः शिशुपालवधः । षष्ठी तत्पुरुष) ।

**ક્રિયાપદ : ષષ્ઠ ગણ** (પરસ્મૈપદ) **मिल्** **(मिलति)** મળવું.

## વિશેષ

**(1) શબ્દાર્થ : सर्वासाम्** બધીનું (સ્ત્રી.) **उपलभ्यन्ते** પ્રાપ્ત થાય છે. **अनुदितः** અનુવાદ કરાયેલો **प-प्रयोगरहितानि** પ-વર્ગ (એટલે પ, ફ, બ, ભ અને મ અક્ષરો) જેમાં ન હોય તેવા શબ્દોવાળાં વાક્યોનો પ્રયોગ, **विहाय** છોડીને, **प्रकृतितः** કુદરત પાસેથી.

**(2) સંધિ :** संस्कृतस्यैव (संस्कृतस्य एव) । निर्धारितो वर्तते (निर्धारितः वर्तते) । कारणमिदमेव (कारणम् इदम् एव) । वैज्ञानिकश्च (वैज्ञानिकः च) निखिलेऽपि (निखिले अपि) । बहवो ग्रन्थाः (बहवः ग्रन्थाः) ।

## સ્વાધ્યાય

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) संस्कृतभाषायां लक्षश्लोकपरिमितः ग्रन्थः कः ? ◯

(क) महाभारतम् (ख) रामायणम् (ग) दशकुमारचरितम् (घ) विष्णुपुराणम्

(2) संसारस्य प्राचीनतमः ग्रन्थः .......... वर्तते ? ◯

(क) रामायणम् (ख) भागवतपुराणम् (ग) ऋग्वेदः (घ) यजुर्वेदः

(3) मुखतः उच्चारणकाले कस्य स्वर-वर्णस्य प्रादुर्भावः प्रथमं भवति ? ◯

(क) एकारस्य (ख) उकारस्य (ग) ईकारस्य (घ) अकारस्य

(4) संस्कृतस्य वर्णमालायां वर्णानां क्रमः कस्य आधारेण निर्धारितः अस्ति ? ◯

(क) व्यञ्जनस्य (ख) स्वरस्य (ग) उच्चारणतन्त्रस्य (घ) वर्णस्य

(5) दशकुमारचरितस्य कतमे उच्छ्वासे प-वर्गप्रयोगरहितानि वाक्यानि सन्ति ? ◯

(क) सप्तमे (ख) पञ्चमे (ग) द्वितीये (घ) अष्टमे

(6) पाणिनिना रचितस्य व्याकरणस्य किं नाम ? ◯

(क) पञ्चाक्षरी (ख) शताध्यायी (ग) अष्टाध्यायी (घ) अष्टाङ्गी

**2. एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

(1) संस्कृतभाषायाः कः ग्रन्थः सर्वासु भाषासु अनूदितः वर्तते ?

(2) व्यञ्जनवर्णेषु कस्य क्रमः प्रथमः वर्तते ?

(3) माघेन रचितस्य काव्यस्य नाम किं वर्तते ?

(4) ऋग्वेदः कीदृशः ग्रन्थः वर्तते ?

(5) महाभारते कति श्लोकाः सन्ति ?

**3. रेखाङ्कितपदानां स्थाने प्रकोष्ठात् उचितं पदं चित्वा प्रश्नवाक्यं रचयत ।**

(किम्, कस्मिन्, कः, कासाम्)

(1) संस्कृतस्य <u>वैशिष्ट्यं</u> प्रदर्शयामः ।

(2) <u>ऋग्वेदः</u> प्राचीनतमः ग्रन्थः वर्तते ।

(3) संस्कृतभाषा <u>भारतीयभाषाणां</u> जननी ।

(4) <u>पञ्चतन्त्रनामकः</u> ग्रन्थः सर्वासु भाषासु अनूदितः वर्तते ।

**4. शब्दरूपैः रिक्तस्थानानि पूरयत ।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| (1) | ग्रन्थेन | .......... | .......... |
| (2) | .......... | .......... | वाक्यानि |
| (3) | .......... | .......... | सप्तमेषु |
| (4) | आचार्यः | .......... | .......... |
| (5) | .......... | .......... | भाषासु |

**5. प्रदत्तान् शब्दान् प्रयुज्य वाक्यानि रचयत ।**

(1) સંસ્કૃત ભાષામાં અનેક ગ્રંથો છે.

संस्कृतभाषा अनेक ग्रन्थ वृत् ।

(2) સંસારનું પ્રથમ પુસ્તક ઋગ્વેદ છે.

संसार प्रथम पुस्तक ऋग्वेद अस् ।

(3) રામાયણ પ્રસિદ્ધ આદિકાવ્ય છે.

रामायण प्रसिद्ध आदिकाव्य वृत् ।

(4) આ પણ સંસ્કૃતની વિશેષતા છે.

इदम् अपि संस्कृत वैशिष्ट्य वृत् ।

**6. मातृभाषया उत्तराणि लिखत ।**

(1) સંસ્કૃતભાષાની કોઈપણ બે વિશિષ્ટતા જણાવો.

(2) સંસ્કૃત વર્ણમાલાની વિશેષતા દર્શાવો.

(3) દશકુમારચરિતની વિશેષતા દર્શાવો.

**પ્રવૃત્તિઓ**

- સંસ્કૃત ભાષામાંનાં ધ્યેયવાક્યોનો સંગ્રહ કરો.
- સંસ્કૃત ભાષાનાં સામયિકોની યાદી બનાવો.

•